
अक्टूबर २०१८ (वै. २०७५)
अश्विन कृष्ण षष्ठी तः कार्तिक कृष्ण सप्तमी पर्यन्तम्
ISSN: 2347-1565
मूल्यम् : २५ रूप्यकाणि



# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

वर्षम् - ६ अङ्कः :- ३

सम्पादकः
डॉ० जीतराम भट्टः
सचिवः

ISSN : 2347-1565 मूल्यम् २५/- रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

वर्षम्-६ अङ्कः-३

अक्टूबर-२०१८

(वै० २०७५ आश्विन कृष्ण षष्ठी तः कार्तिक कृष्ण सप्तमी पर्यन्तम्)

सम्पादकः

डॉ० जीतराम भट्टः

सचिवः

सहायकसम्पादकः

प्रद्युम्नचन्द्रः

पत्रिका-परामर्शकाः

डॉ० आशुतोषदयाल माथुरः

डॉ० पंकजा घई

डॉ० पूर्वा भारद्वाजः

डॉ० धनञ्जयमणि त्रिपाठी

- अनुक्रमणिका -

| क्र.सं. | | | पृ.सं. |
|---|---|---|---|
| १. | सम्पादकीयम् | | |
| २. | बाल गांधी(नाटकम्) | -डॉ. शिवप्रसादः त्रिपाठी | १ |
| ३. | अभ्यासेन तु कौन्तेय | - श्री रघुनाथ भट्टः | ६ |
| ४. | बालवैज्ञानिकाः | - शिक्षा सेमवालः | ७ |
| ५. | विद्या-गौरवम् | - श्री अभय सिंहः | १० |
| ६. | श्रीसीतारामचरितामृतं नाटकम् | -डॉ. कीर्तिवल्लभः शक्टा | १२ |
| ७. | मातुलपराजयम्-लघुनाटकम् | -डॉ. नारायणशास्त्री काङ्करः | १७ |

दिल्ली संस्कृत अकादमी

(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)

DELHI SANSKRIT ACADEMY

(GOVT. OF N.C.T., DELHI)

**प्रकाशकः**

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-११०००५

दूरभाषः - ०११-२३६३५५९२,२३६३७७९८

ISSN : 2347-1565

© दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

© Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

## सदस्यताशुल्कम्

| | | |
|---|---|---|
| प्रति-अङ्कम् | : | 25 रूप्यकाणि, $2.5 |
| वार्षिकम् | : | 250 रूप्यकाणि, $25.00 |

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः (मनिआर्डर) अथवा सी०टी०सी० चैक माध्यमेन

**(दिल्लीसंस्कृतअकादमीपक्षे)**

Mode of payment:

Demand Draft, Money order or by CTC Cheque

( In favour of "Delhi Sanskrit Academy")

E-mail Id : delhisanskritacademy@gmail.com

Website : www.sanskritacademy.delhi.gov.in

# सम्पादकीयम्

विद्यालयेषु छात्राणां सर्वाङ्गीणविकासाय सर्वासां विद्यानां प्रशिक्षणं भवति। लोककल्याण-भावनायाः प्रशिक्षणमपि तास्वन्यतमा विद्यते। प्रार्थनामाध्यमेन छात्राः विषयेऽस्मिन् सिद्धाः भवन्ति। साम्प्रतिके काले केचन जनाः चर्चां कुर्वन्ति यद् विद्यालयेषु प्रार्थना भवेद् न वा, यदि चेत् भवेत् कीदृशी भवेत्। केनापि जनेन सर्वोच्चन्यायालये वादोऽपि उपस्थापितः यत् संस्कृते हिन्दीभाषायां वा संस्कृते प्रार्थना केवलं हिन्दूनां कृते भवति। तेनोक्तं यत्संस्कृते हिन्दीभाषायां प्रार्थनोच्चारणेन धार्मिको भेदभावः संजायते। वादोऽयं सर्वोच्चन्यायालये विचाराय प्रस्तुतोऽस्ति। वयं जानीमो यद् हिन्दी संविधानसम्मता राष्ट्रभाषा विद्यते तत्र संविधाने एवोल्लिखितं विद्यते यत् हिन्दीभाषायाः संवर्धनाय संस्कृतालम्बनं स्वीकरणीयम्। इत्थं सम्पूर्णे देशे विद्यालयेषु हिन्दीभाषायां संस्कृते वा प्रार्थना संविधानसम्मतैवाऽस्ति। भारतस्य राष्ट्रगानमपि संस्कृतनिष्ठहिन्दीभाषायामेवास्ति। विद्यालयेषु विविधभाषाभाषिणश्छात्राः पठन्ति सामूहिकरूपे सर्वासु भाषासु प्रार्थना तु नैव सम्भवाऽस्ति। अथ च संस्कृतभाषायाः प्रार्थना सार्वभौमिकी सार्वकालिकी च वर्तते। संस्कृतं सर्वेषां जीवनोत्कर्षाय लोककल्याणाय देशोन्नत्यै चास्ति। संस्कृते गीयमाना प्रार्थना विश्वस्य कृते वर्तते 'द्यौः शान्तिरन्तरिक्ष शान्तिः पृथिवी शान्तिरापः शान्तिः औषधयः शान्तिः।' तथा च 'सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्।'

**सुमनसां प्रतिभाप्रतिभासिका**
**क्षितितलात्तमसश्च विनाशिका।**
**शिशुकिशोरयुवप्रियसाधिका**
**विजयते भुवि संस्कृत-चन्द्रिका॥**

**निवेदकः**
**डॉ. जीतरामभट्टः**
**सचिवः**

# बाल गांधी (नाटकम्)

-डॉ० शिवप्रसादः त्रिपाठी

## यवनिकोद्घाटनम्

(बालः मोहनदासः स्वपितृगृहकक्षे स्यन्दिकास्थरन्यमनसकरिवमुख- मलीनः विचार मग्नः स्व मनसि विचारयति)

प्रकट रूपेण- हरिश्चन्द्रनाटकमवलोक्य सत्यं प्रति तथा श्रवण कुमारस्य कथां पठित्वा पित्रोः भक्तिं प्रति तथा पुतलीबाई मातुः शिक्षया सत्यं अहिसां परोपकारं प्रति निष्ठा सञ्जाता।

(आगच्छन्तं श्री भावजीव जोशी गृहमित्रम्) उत्थाय- बह्मन् आगच्छेत् सुस्वागतम्। सुखदागमनम्।

स्यन्दिकास्थः श्री भावजीवः वदति- मोहनदासम् भो वत्स! अन्य मनस्करिव मुखमलीनः किमर्थमसि।

एकाकी किं विचारयसि तात्।

**मोहनदासबालगान्धी**- विचारयामि विद्यापठनकठिनम्। अतः न पठिष्यामि विशेषतः आंग्लभाषाम्। सा न रोचते मया।

**श्री भावजीवः**- वत्स! शृणुयात्- त्वया अवश्यमेव पठनीयम् विशेषतः आग्लभाषां कुशाग्र बुद्धियुक्तः त्वम्। विश्वासमस्ति त्वं विद्याध्ययनं कृत्वा भारतस्य प्रतिष्ठामवश्यमेव वर्द्धयिस्यसि।

**बालगान्धी**- श्रीमान्! भवत्विचारं सुष्ठुतरम्। स्वदेशभारतमातृभूमिं प्रति महती निष्ठा। सा आंग्लशासकैः परतन्त्रा, लुण्ठिता दलिता अवमानितानाचारयुक्ता चतुर्दिक्षु दरीदृश्यते। आंग्लात्याचाराणि नरीनृत्यन्ति।

**अस्माकं भारतवर्षं हिन्दुस्तानमितिर्यते।**
**महतां जन्मनां राम कृष्णादीनामियं धरा।।**

**श्रीभावजीवः**- अत एव प्रेरयामि, अग्रिमाध्ययनं विधायश्रेष्ठ ज्ञानार्जनं कुर्यात् सम्भवोऽस्ति त्वया एव भारतस्य कल्याणं भवेत्। आंग्लभाषायामेवाध्ययनं कुर्यात्। यतोहि आंग्ल शासनत्वात्।

**बालगान्धी**- भवदाज्ञामक्षरशः पालयन् निष्ठया स्नातको भविष्यामि।

(यवनिका पतति)

(यवनिकोद्घाटनम्)

## द्वितीयदृश्यम्

(कर्मचन्द्रः मोहनदासस्य पिता विवाहोत्सव सामग्रीं सम्भालयन् विवाहमण्डपं स्थाप्य स्वगृहे इतस्ततः धावति।)

**बालगान्धी**- (कर्मचन्द्रं प्रति)- भो तात्! त्रयोदश वर्षीयस्य मम् विवाह-बन्धनं न रोचते मया।

**कर्मचन्द्रः**- अहं मौड्वंशजः, बालविवाहप्रथानुसारेणोचितसमयमस्ति। स्व जात्युत्पन्ना कस्तूरबा नामिका बाला सुशीलवती मया विज्ञापिता। तया सह, तव विवाह बन्धनं भविष्यति। गान्धी-आज्ञा-गुरुणा ह्यविचारणीया" इतिभावनया स्वीकरोमि बालविवाहम्।

(विवाहमण्डपे साखिभिः सह प्रविशति कस्तूरबा बालिका उपविशति संकेतितपाद पीठिकामुपरि। पश्चात् सुन्दरवस्त्रावृतोष्णीशसहित बालगान्धी अपि आगत्योपविशति संकेतितासने।

विवाह प्रक्रिया प्रारभति आचार्यः।

आचार्यः (स्वस्तिवाचनं वाचयति) देवयज्ञं पूरयति पश्चात् आचार्याज्ञया कस्तूरि बालां पुरतः विधाय तद्सहस्तःवरः हवन कुण्ड स्थितवह्निं परिक्रम्यभ्रामारीश्चकार। सिन्दूरदानं करोति। वधुं-प्रत्यासक्तः द्वितीय कक्षायामगच्छतः।

**बालगान्धी**- (वदति पत्नीं प्रति)- महाभागे। भवतीं कुशलशिष्टगृहकार्यदक्षां सेवाभावयुक्तां पत्नीं प्राप्य गौरवान्वितोऽस्मि द्यूतक्रीडायां तु पराजितोऽहं भवत्या। (विहसति) पत्नी कस्तूरबा-भोस्वामिन्! सदाचार युक्त मातृपितृभक्तपतिं प्राप्त धन्याऽहम्।

(यवनिका पतति)

(यवनिकोत्थिते तृतीय दृश्यम्)

मोहनदासः तस्य माता पुतलीबाई परस्पर वार्तां कुरुतः।

**मोहनदासः**-भो मातः! कालेज मध्ये स्वल्पधनोऽहं परिश्रमाधिक्ययुक्तां शिक्षा प्रत्यन्यमनस्कोऽस्मि।

"तदानीमेव गृहमित्रं भावजोशी आगतः"

श्रीभावजोशी कथयति पुत्तलीबाईमातरं - भद्रे! तवबालकः कुशाग्रबुद्धिरग्रे पठनेच्छुः, अतः वाक्कील विद्यामध्येतुं विलायतं विदेशे प्रेषय।

**धर्मभीरुमाता**-"राम राम", विधर्मिदेशे पठिष्यति। श्रीमन् पित्तृहीनः धनहीनबालकः। जातिव्यवस्थायां पारे समुद्रं न कदापि यायात्। अहं तुवैष्णो।

"मद्याच्च मासान्नहि तत्ररक्षा"

"करोमि किं किं नहि निश्चयो मे"।

**श्री भाव जोशी**-भो आर्ये! पुरातन विचारं परित्यज्याधुनिक प्रवाहे प्रवहितव्यम् यदि मोहनरभक्ष्य पदार्थान् न सेवितुं प्रतिज्ञां करोतु।

**माता**- तदवस्थायां सम्भवोऽस्ति।

**मोहनदासः**- भोमातः! प्रतिज्ञां करोति तव समक्षे।

"मद्यं न मासं नहि संस्पृशेयं, स्वब्रह्मचर्य च दधामि नित्यम्"

**हे मातः**- कुमार्गात् रक्षिष्यति रामः

(पुतलीबाई मात्रा स्वकीयानि भ्रातुश्च तथा वध्वोराभूषणानि विक्रयं कृत्वा धनस्य व्यवस्था कृता)

(तथा बम्बई नगरं प्रस्थानं कृतं मोहनदासेन्)

(बम्बईनगरे यात्रा नियम पूर्णे कृते एवं जलयानस्थगनस्थाने श्री त्र्यम्बकमजूमदार महाभागः मिलति वदति च)

**मजूमदारः**- भो मोहनदास! तव जलयान(जहाज)यात्रा मया सह्यम कक्षे एव भविष्यति।

**मोहनदासः**- श्रीमन् भवत्महती कृपा भविष्यति।

चतुर्थ सितम्बर 1888 ईशवीये विलायत यात्रा प्रारम्भोऽभवत्। विलायत देशे एकावृद्धा गृहे ववास। तस्याः गृहे रविवासरे अनेकाः आंग्लयुवतयः आगच्छन्ति। सम्मोहयन्ति च कटाक्षैः मोहनदासम्।

एका आंग्ल युवती- उक्तवती

Please Dance with me प्लीज/डान्स विथमी

**मोहनदासः** - मदर! प्लीज़/ इत्युक्त्वा वहिर्गतः/ त्यक्तं तद् गृहम्।

एकः भारतीय विशिष्ट जनः पृच्छति- भो भद्र! कुत्रतरागमनं भवतः किं कार्यार्थं किं लक्ष्यमस्ति।

**मोहनदासः**- वाक्कीलोपाधिं प्राप्तुमागतोऽस्मि।

जनः श्रुत्वा विचार्य च- मम् गृहे निवसितव्यम्।

**मोहनदासः**-अवश्यमेव।

(द्वितीये दिवसे तत् भारतीय जनेन सह एकागोष्ठ्यां गच्छति तत्र प्रस्तरे मा दिराण्ड मांसादि वस्तूनि सुसज्जितानि आसन्।

**एकः**- My Dear, Mohan Das welcome (माई डियर, मोहनदास वेलकम)

द्वितीयः- Please sit down (प्लीज सिट डाउन)

प्रस्तरस्थिताभक्ष्यपदार्थानवलोक्य प्रतिज्ञा भीरुः मोहनदासः उत्थाय निर्गच्छति।

प्रथम- How you will adjust yourself in england (हाउ यू विल एडजेस्ट योर सेल्फ इन इंग्लैण्ड)

द्वितीयः- Better you go back to india you can not adjust in London (बेटर यू गो बैक टू इण्डिया। यू कैन नॉट इन एडजेस्ट इन लन्दन)।

निर्गच्छति मोहनदासः वहिः वदति- भारतीयमित्रम्।

**मित्रम्**- प्रिय! लन्दन नगरे स्व भारतीयतां कथं रक्षेत् अत्रतु सुरासुन्दरीमांसादिकानां बाहुल्यमस्ति।

**मोहनदासः**- मातुः समक्षेकृत प्रतिज्ञा एव रक्षिष्यति।

यदा मोहनदासेन द्वितीय गृहे निवासं कृतम्- तस्य स्वामिनी पथभ्रष्टकर्तुं मोहनदासस्य समीपं आगत्य कथयति!

स्वामिनी आंग्ल युवती- मोहनदास! मया सहकक्षान्तरे गच्छेः।

**मोहनदास**- (तस्याः भ्रष्ट विचारं विचार्य) मातः! अहं तु ब्रह्मचारी/इत्युक्त्वा श्री रामं स्मृत्य तत्रतः पलायति।

गायति च- निर्बल के बल राम रघुपति राघव राजाराम पतीत पावन सीताराम। यवनिका पतति।

## चतुर्थ दृश्यम्

वाक्कील विद्यासंयुक्त ''बैरिष्टर'' इत्युपाधि प्राप्य भारतं पुनरावृत्तः स्वगृहस्य कक्षायां विचारयति।

भारते भाति संस्कृतं संस्कृतिश्च

भारतीय संस्कृतिरक्षार्थं संस्कृतभाषा एव समर्था।

विचारयति अतः

''श्री संस्कृतं संस्कृति पूर्णभाषा सा राष्ट्र भाषा भवतच्च तूर्णम्''

यद्यपि आंग्ल शासने भारतीय वाक्कीलस्य प्रक्रिया निरुद्धा परन्तु विघ्नत्वेऽपिमोहनदास गान्धिनः वाक्कील कार्य सुचारु रूपेण प्रारभत।

एकः कथयति।

विरोधितो गौर जनैस्तथापि

वाक्कीलतां सुष्ठतया चकार।

व्यपारिणः भारतजास्तु सर्वे

बैरिष्टरं स्वं विदधुः प्रहृष्टा।।

समवेत स्वरैः- ''रघुपति राघव राजा राम पतीत पावन सीता राम''

(यवनिका पतति।)

**- सी-३५०४ सेक्टर ६**
**सपना कालोनी, राजाजीपुरम्**
**लखनऊ, उत्तर प्रदेशः**

# अभ्यासेन तु कौन्तेयः

– रघुनाथ भट्टः

दिल्लीनगरस्य प्रतिष्ठित विद्यालये सार्थकः अथर्वः च पठतः। उभावपि अष्टं कक्षायां आस्ताम्। उभयोः मध्ये प्रगाढः स्नेहः आसीत्। तौ सहैव क्रीडतः पठतः च। परिक्षायाः कालः सन्निकटः आसीत्। उभावपि मिलित्वा कठिनं परिश्रमं विधाय परीक्षायाम् उत्तमाङ्कैः उत्तीर्णौ।

सर्वेऽपि विद्यालयीयाः छात्राः नवमकक्षायां गन्तुमुत्सुकाः आसन्। केचन छात्राः अन्यत्र विद्यायलेषु प्रवेशाय गताः परञ्च सार्थकार्थवौ निर्णितवन्तौ यत् आवाम् अस्मिन्नेव विद्यालये पठिष्यावः। सम्प्रति नवंया कक्षायां केचन छात्राः पुरातना केचन नूतनाः च आगताः। तेषु नूतनेषु छात्रेषु एकः छात्रः ओडिशातः अपि आसीत्। तस्य नाम रामकृष्णदासः वर्तते। पितुः स्थानान्तरणकारणात् देहल्यां सः पठितुमागतः।

प्रथमे दिवसे यदा सः स्वपरिचयं दत्तवान् तर्हि सर्वे छात्राः तं उपहसितवन्तः यतोहि तस्य मुखात् अनायासेन एव उड़िया भाषायाः द्वित्रिपदानि निस्सृतानि, यद्यपि शिक्षकेन छात्राः तर्जिताः। परञ्च शिक्षकस्य गमनात्परं छात्राः पुनः तं उपहसितवन्तः।

यद्यपि रामकृष्णदासः पठने तु कुशाग्रः तथापि हिन्दी भाषायाः सम्भाषणे तस्याभ्यासः नासीत्। सः बारम्बारं चिन्तयति यत् अहं कथमपि हिन्दीभाषायां सम्भाषणे दक्षतां प्राप्नुयाम्। अपरपक्षे सार्थकः अथर्वः च परस्परं वार्तालापं कुरुतः यत् आवाभ्यां रामकृष्णदासस्य साहाय्यं करणीयम्।

अपरेद्युः रामकृष्णदासः प्रसन्नवदनः आसीत् यदा तस्य पार्श्वे सार्थकः अर्थवः च आगच्छतः। उभौ रामकृष्णेन सह मैत्रीं कुरुतः। शनै शनैः वार्तालापेन सञ्चार–माध्यमेन च उभौ रामकृष्णस्य हिन्दी प्रशिक्षणम् आरभेते। शनैः–शनैः रामकृष्णन् अपि हिन्द्यां प्रवीणो जातः।

अथ सूचना प्राप्ता यत् विद्यालये विविधप्रतियोगिताः भविष्यन्ति। सर्वे छात्राः उत्साहिताः आसन्। शिक्षकैः छात्राः सूचिता यत् प्रतियोगितासु ते एव भागं ग्रहीष्यन्ति ये प्रतियोगितायाः पूर्वम् अभ्यासे उत्तीर्णाः भविष्यन्ति। सार्थकार्थवौ स्व प्रतियोगितायाः सिद्धतां कुरुतः रामकृष्णस्य हिन्दीभाषणाय साहाय्यमपि कुरुतः।

रामकृष्णदासः अपि प्रतिदिनं गृहं गत्वा हिन्दीभाषणस्य अभ्यासं करोति। अभ्यासवाचने सः उत्तीर्णः। परञ्च मुख्य प्रतियोगिता अवशिष्टा आसीत्। सः तदर्थं कठिनं परिश्रमं कृतवान्।

अन्ततः प्रतियोगिता दिवसः आगतः। सर्वे छात्राः भागं ग्रहीतुं तत्पराः आसन्। प्रतियोगिता आरब्धा। सर्वैः अतीवश्लाघनीयं प्रदर्शनं विहितम्। रामकृष्णन् अपि सर्वोत्तमं प्रदर्शनं कृतवान्। हिन्दीभाषणप्रतियोगितां प्रथमं स्थानं प्राप्तवान्। सर्वेऽपि छात्राः शिक्षकाः च आश्चर्य चकिताः अभवन्। तदा प्रभृति रामकृष्णदासः समेषां प्रियतमः अभवत्। छात्राः अपि तं प्रति उचित व्यवहारं कर्त्तुमारब्धवन्तः।

**- दिल्ली विश्वविद्यालयः**

अनुमोदितः। अनुभूतिः गृहात् समाचारपत्राणि आनीतवती। देवालये दीपप्रज्ज्वलनाय स्थापिता अग्निशलाकापि सा सहैव आनीतवती। सर्वा सामग्री एकस्मिन् पात्रे अवस्थाप्य वह्निप्रज्ज्वालनमभूत्। किंचित् समयानन्तरं वह्निः नष्टः। सर्वैरनुभूतं यत् बह्नये। बहूनां समाचारपत्राणां आवश्यकता वर्तते। गृहे विद्यमानानां समस्तसमाचारपत्राणां प्रज्ज्वालनमपि असम्भव्यं आसीत् यतोहि रात्रौ तर्जनस्य भयम् आसीत्। परन्तु कार्यारम्भे सति विघ्नभयेन मध्ये एवं विरामः न क्रियते। सर्वैः विनिर्णीतं यत् ते स्वीयगृहेभ्यः स्वल्पानि समाचारपत्राणि आनेष्यन्ति, एवं प्रयोगोऽयं सफलताम् एष्यति। पुनः समाचारपत्राणि एकत्रीकृतानि। धू-धू इति ध्वनिना साकं पुनः वह्निः जाज्वल्यमानः अभूत्। अनुभूत्या विचारितं यत् अविच्छिन्नरूपेण वह्नेः प्रज्ज्वलनं नास्ति। इदमेव प्रयोगसाफल्ये बाधकं वर्तते। तया एकः साहसिकः निर्णयः स्वीकृतः। स्वगृहात् सा सर्वाणि समाचारपत्राणि आनीतवती। स्वप्रयोगे असफलता अस्वीकार्यासीत्। गृहं परितः कृष्णधूमः व्याप्तः। मित्रगणैरपि एकैकं कृत्वा तस्याः सहभागिता परित्यक्ता, यतोहि संप्रति एतस्मै कृत्याय दण्डभयम् आसीत्। समागता गोधूलिवेला, मित्रगणाः च गतवन्तः। एकाकिनी एव गृहात् बहिः अनुभूतिः स्थिता आसीत्, स्वीय निष्फल प्रयोगेन साकम्। परं अधुना तस्याः मनसि प्रयोगविफलतायाः भयं नासीत्। अपितु कालः आसीत् पित्रोः प्रत्यागमनस्य।

**- ६६, ए तृतीयतलम्**
**रूपनगरम्, देहली**

# विद्या–गौरवम्

– अभय सिंहः

केन्द्रियविद्यालये अष्टमकक्ष्यायाम् अधीयानः सौरभः स्थूलशरीरः अलसः छात्रः आसीत्। यद्यपि सः बुद्धिहीनः न आसीत् किन्तु प्रमादस्य कारणेन अध्ययने क्रीडायां वा तस्य रुचिः न आसीत्। स्थूलशरीरस्य कारणेन स्वसहपाठिभ्योऽपि वरिष्ठः प्रतिभाति स्म। छात्राणां कृते सः विनोदस्य साधनमासीत्। सर्वदा स्वकल्पनासंसारे एव निमग्नः सः न कदापि परीक्षासु क्रीडास्पर्धासु वा सुपरिणामं प्राप्तवान्। दूरदर्शने समागताः कार्यक्रमाः एव तस्य प्रियाः आसन्। अतः वार्षिकपरीक्षायामपि सः गणितविषये अनुत्तीर्णः अभवत्। अध्ययने अध्ययनातिरिक्तेषु च गतिविधिषु सौरभस्य अरुचिम् अनुत्साहं च दृष्ट्वा तस्य मातापितरौ खिन्नौ अभवताम्। तौ चिन्तितवन्तौ यत् नूनं गृहस्य परिवेशः सौरभस्य प्रमादस्य कारणं वर्तते, यदि सः आवासीयविद्यालयं गच्छेत् तस्य प्रवृत्तिः अध्ययने सम्भवति। इदं विचिन्त्य तस्य मातापितरौ तम् एकस्मिन् प्रतिष्ठिते आवासीयविद्यालयें कृतवन्तौ। देववशात् सौरभः तत्र प्रवेशपरीक्षाम् उत्तीणवान्। किन्तु तत्रापि तस्य प्रवृत्तिः न परिवर्तिता। स्थूलशरीरस्य कारणेन सः सर्वदा सहपाठिनाम् उपहासपात्रं भवति स्म। एकदा विद्यालयस्य वार्षिकोत्सवे ये छात्राः वार्षिकपरीक्षासु प्रथमश्रेण्याम् उत्तीर्णाः आसन् तथा च ये विद्यालयस्य प्रतिस्पर्धासु विजिताः आसन् तेभ्यः सर्वेभ्यः छात्रेभ्यः प्रधानाध्यापकेन पुरस्कारः प्रदत्तः तथा च विद्यालयपरिसरस्य विभागानाम् उत्तरदायित्वमपि तेभ्यः प्रदत्तम्।

एतद् दृष्ट्वा सौरभः चिन्तितवान् ''यदि अहमपि अध्ययनं करोमि, अहमपि विशिष्टं सम्माननं दायित्व च प्राप्स्यामि, सहपाठिषु च मम यशः वर्धिष्यते।'' एषा महत्त्वाकांक्षा तस्य मनसि समुत्पन्ना।

तदनन्तरं सौरभः अध्ययने प्रवृत्तः। शनैः शनैः अध्ययनस्य सुपरिणामेन सः विविधविषयेषु नैपुण्यं लब्धवान्। अधुना न केवलं तस्य सहपाठिनः अपितु वरिष्ठछात्राः

अपि विविधविषयाणां शङ्कासमाधानाय तं समुपगच्छन्ति स्म। विशेषेण गणितविषये तेन नैपुण्यं प्राप्तम्। तस्य प्रगतिम् अवलोक्य केचन छात्राः प्रसन्नाः न आसन् अतः ते सौरभस्य स्थूलतायाः कारणेन सर्वदा तम् उपहसन्ति स्म।

एकदा विद्यालयस्य अधिष्ठाता विद्यालयनिरीक्षणार्थं समागतः। प्रधानाध्यापकस्य पुरतः अयं प्रश्नः समुपस्थितः यत् तस्य स्वागतं कर्तुं कः छात्रः गमिष्यतीति?

सः छात्रान् अपृच्छत् यत् कः एतत् कार्यं सम्पादयिष्यति।

सर्वे छात्राः स्वहस्तम् उत्थापितवन्तः । किन्तु सौरभः संकोचवशात् हस्तम् उपरि न कृतवान्। सः मुखमधः कृत्वा मौनं स्थितः। सः चिन्तयति स्म यत् प्रधानाध्यापकमहोदयः मम स्थूलदेहस्य कारणेन स्वागतार्थं माम् न प्रेषयिष्यति। अतः एव तस्य मनसि संकोचः आसीत्। प्रधानाध्यापकः सौरभं दृष्टवान् सः सौरभस्य मनोगतान् भावान् अवगतवान्। सः सर्वेषां छात्राणां पुरतः उक्तवान् यत् शारीरिकगौरवात् विद्यागौरवं बलवत्तरं भवति। अतः सौरभः एव सेवार्थं गमिष्यति तथा च अद्यप्रभृति अयं विद्यालये निरीक्षकः (मॉनीटर इति) भविष्यति।

प्रधानाध्यापकस्य वचनं श्रुत्वा सौरभस्य अधोगामिनी दृष्टिः प्रभातकाले उदीयमानः भास्वान् इव शनैः शनैः ऊर्ध्वगामिनी समपद्यत।

–५६५०/२, नवचन्द्रावलग्रामः
देहली–११०००७

# श्रीसीतारामचरितामृतं नाटकम्

-डॉ० कीर्तिवल्लभ शक्टा

**-गतांकात् अग्रे-**

**( दृश्यपरिवर्तनम् )**

पुनः हिमालयस्य दृश्यम्, डमरुहस्तः प्रसन्नाननः शिवः नाट्येन कुम्भकर्णस्यान्तिकं गच्छन्नस्ति।

**कुम्भकर्णः**- शिवं विलोक्य मनस्येवं विचारयति "अहो सौभाग्यं मे जागर्तीदानीम्। कथं न्वहमद्य बुभुक्षां शान्त्यर्थम् अहर्निशं भोजनार्थञ्च मासषटकं यावत् जागरणाय तदनु दिवसमेकं यावत् निद्राकरणाय वरद्वयं याचे।।" अहो! पश्य मे बुद्धिकौशलम्। बाणेनैकेन द्विसन्धानम् आहारवृद्धिः शत्रुसंहारश्च।

(शिवः कुम्भकर्णस्य समीपे समागत्य) वत्स कुम्भकर्ण! प्रसन्नोऽस्मि तव साधनया वरं ब्रूहि किं ते मनसि खलु?

**कुम्भकर्णः**- हस्तौ संहतौ कृत्वा " देव! साम्प्रतं वरद्वयं याचे, प्रथमेन षड्मासिकी निद्रा द्वितीयेन चावर्षे दिनद्वयस्य जागरणम्।

**शिवः**- तथास्तु वत्स! शुभं भवतु तव। इत्युक्त्वा शिवः विभीषणस्य समीपे निर्गच्छति।

**शिवः**- ध्यानरतं विभीषणं वीक्ष्य वत्स! ध्यानेनालम्। माम् अवलोकय इदानीं साफल्यतां याति तावकीना सुसाधना, नितरां प्रसन्नोऽस्मि। किं वाञ्छसि वरं ब्रूहि।

**विभीषणः**- रोमाञ्चितः सन् प्रथमं पादयोः पतति साष्टाङ्गेन प्रणमति तदनु हनूमद्मुद्रया हस्तौ संहतौ कृत्वा कथयति-

**हरेर्ध्यानं हरेर्ज्ञानं हरेर्नाम सुकीर्तनम्।**
**भवेन्मे जीवने नूनं हरेश्शरणकेवलम्॥**

प्रभो! सत्यं वदामि हरेर्नामोच्चारेण सह हरिश्शरणमेव मे गतिर्भवेत्।

**शिवः**- तथास्तु वत्स! यथारूपं याचितस्त्वया ननु। भक्तियुक्ता तवा वाणी माम् नितरां मोदयते।

## ( शिवस्यान्तर्धानम् )

**रावणः**- आहा......ऽऽऽ उच्चैः विशिष्टमट्टाट्हासं करोति विलम्बं यावत् अट्टहासं कृत्वा इदानीमहं ब्रह्माण्डविजयी रावणः संवृत्तः। मया विजिता मृत्युः। तत्र निखिले ब्रह्माण्डे न च मर्त्याः नामर्त्याः माम् मारयितुं क्षमा। एतादृशं वरं मया शम्भोस्सकाशात्सम्प्राप्तः। (विभिषणं वीक्ष्य)-भोः विभीषण! त्वया किं सम्प्राप्तः त्वरितं कथय।

**विभीषणः**- (रावणस्य चरणौ स्पृश्य) भ्रातः! ब्रह्माण्डे न किमपि सत्यं यत्सत्यं तदेव याचितं मया।

**रावणः**- भोः मूर्ख! त्वया किं याचितः स्पष्टं कथय्? किं भवति सत्यं खलु। इदानीमहमेव सत्यम्। मयाऽमरत्वं सम्प्राप्तम् अनेन।

**विभीषणः**- भ्रातः! शास्वतो भवति सत्यं, भक्तिः तस्य साधनिका अतो भक्तिर्मे याचिता किल। यतो हि -(गीतम्)

**भवतारणाय भक्तिः सरला कृता धरायां।**
**परमात्मनेन मन्ये सरणिः कृता धरायाम्।।**
**साफल्यकामनायै ननु जीवनस्य लोके**
**भक्तिर्हि राजतेऽत्र मातेव पालनाय।।**
**सम्वर्ध्य भक्तिराशिं मनुजैः सदाऽत्र जाने।**
**मोक्षाय धी स्वकीया सर्वैः सुयोजनीया।।**

**रावणः**- भोः ममाभिन्नमतिकुम्भकर्ण! भो मम हृदयारविन्द लघुभ्रातः। चिन्तयामि त्वया तु ममानुरूपमेव शङ्करसकासाद्याचितः स्यात्।

**कुम्भकर्णः**- भ्रातः! चिन्तास्त्वचितासीन्ममपरमत्यधिककुतूहलवशात्त्वरयाधिक्येन च सर्वं वैपरीत्यं गतः खलु। मदीयोदयेन दौर्भाग्येण मया प्रतिवर्षे दिवसमेकं यावज्जागरणेन सह मया षण्मासिकी सुनिद्रा याचिता। इदमेव महत्कष्टम्।

**रावणः**- नैराश्यं मा भज। सद्यः लंकां प्राप्य त्वदर्थे शयनाय समुचितव्यवस्थया सह जागरणदिनस्य प्रातराशेण सह रात्रिपर्यन्तां भोजनव्यवस्थां च विधास्यामि। इदानीं वयं लङ्का प्रति गच्छामः।

**पटाक्षेपः**

**दृश्यपरिवर्तम्**

(लङ्कायां दशाननः रावणः स्वसैनिकैः सह सिंहासने विराजते। सहसा सेनापतेः प्रवेशः।)

**सेनापतिः**– महाराज! किमहं राजसभायां प्रविष्टुं शक्नोमि।

**रावणः**– आगच्छ सेनापते आगच्छ। लोकवृत्तं कथय।

**सेनापतिः**– जयतु महाराज् कर्णपरम्परया भवतां शक्तिविषयकीं वार्तां श्रुत्वा भीतभीताः सन्ति पृथिव्याः माण्डलिकाः भूमिपालाश्च। किमधिकं राजन् स्वर्गस्थाऽमराऽपि भवतां शक्तिमनुभूय कम्पन्ते।

**रावणः**– आम सेनापतेः (अट्टहासं कुर्वन्)

**धरायां द्युलोके च पाताले च रसातले।**
**देवाः तथा नराः सर्वे राजानः विजिता मया।**

**सेनापतिः**– महाराज! श्रुतं मया यद्देवाः भवतां मृत्युकामनया ब्रह्माणं गताः तदनु ब्रह्मणा सम्प्रेरिताः विष्णुं समुपागताः तत्र विष्णुना पृथिव्यां दशरथगृहे पुत्ररूपेणावतरिष्यामीति आशवस्ताः साम्प्रतं ते कपिरिच्छभल्लूकादया भूत्वा भारतस्य गिरिपर्वतेषु जायमानाः दृश्यन्ते।

**रावणः**– हं हो सेनापते। मूर्खोऽसि। दाशरथिः माम्मारयिष्यति, स्वयं त्रैलोक्याधिपतिरहं पुत्रश्चापि मम......मेघनादः, को न जानाति महाबलीकुम्भकर्णस्य शक्तिबलञ्च, सेनापतेः त्वमिदानीं विश्रमतु। सेनापतिः रावणं प्रणम्य निर्गच्छति।

(किञ्चिच्क्षणानन्तरम्)

रावणः– भो सेवकाः पुष्पकं सज्जयतु, पुष्पकमुपविश्येदानीमहं विधिलोकं गमिष्यमि।

(पुष्पकारूढः रावणः आधुनिकयन्त्राणासाहाय्येन नेपथ्ये उड्डीनः दृश्यते।)

**( पटाक्षेपः )**

**( ब्रह्मलोकस्य दृश्यम् )**

**( भव्यासेन विराजमानं ब्रह्माणं विलोक्य )**

**रावणः**– भगवन! सादरं प्रणमामि।

**ब्रह्मा**– प्रसन्नो भव वत्स! इहागमनप्रयोजनं वद।

**रावणः-** केन हस्तेन मे मृत्युः लिखिता भो सृष्टुः त्वया।
ज्ञातुमत्रसमायातः रावणः राक्षसाधिपः॥

**ब्रह्मा-** वत्स! यज्जानामि तत्तुभ्यं निवेदयामि। श्वः दशरथस्य विवाहो सुमित्रया सह भविष्यति। तस्या पुत्रेण रामेण तव मृत्युः मया पूर्वमेव लिखिता अतो सत्यमिदं

**हरिर्दाशरथिर्भूत्वा रामरूपेण वै खलु।**
**हनिष्यति ध्रुवं तुभ्यं संशयो नास्ति कश्चन॥**
**वैदेह्याकारणं वत्स वैरो तव भविष्यति।**
**अनेन तव वंशस्य नाशः संलिखितो मया॥**

**रावणः-** भो ब्रह्मन्! रावणोऽहं तव लेखिनीं मिथ्या कर्तुं सक्षमः। इदानीं गच्छामि।

**रावणस्य प्रत्यागमनम् पुनर्लङ्कायाः दृश्यम्।**

(रावणः मनसि किंचित् विचिन्त्य स्वप्रकोष्ठे एकाकी इतस्ततः भ्रमति। अन्ते आसनम् उपविश्य कथयति।)-

**रावणः-** किं विधेः वचांसि सत्यं भविष्यन्ति। अहमपि स्वात्मसम्मानस्य हठस्य च विरोधं न करिष्यामि। आह! मम हृदये झटिति सदुपायः समायातः। दशरथस्य विवाहो सुमित्रया सह भविता, अतो प्रच्छन्नरूपेण वरयात्रायां गत्वा दशरथसुमित्रायाः हरणं कृत्वा तयोः वधं करिष्यामि।

## दृश्य परिवर्तनम्

विवाहोत्सवात्नगरं प्रति प्रत्यावर्तन्ती वरयात्रा, यत्र महदानन्दः दृश्यते, विविधाः पटहाः वाद्यविशेषानां ध्वनिः श्रूयते, नागरिकाणां नृत्याङ्गनानाञ्च नृत्यं जनैः पथि दृश्यते। रावणः अदृश्यरूपेण तत्र गच्छति परं कौशल्या दशरथं न विलोक्य प्रच्छन्नरूपेण स्वविद्यां पृच्छति नेपथ्ये विद्यायाः उत्तरं भवति। आकाशवाणी "भो रावण! कौशल्यादशरथौ तु नद्याः ररव्या मार्गेण अयोध्यां प्रति आगच्छतः इदानीं राजधानीतः नातिदूरे वर्तते तयोर्तरणिः रावणः प्रसन्नः सन् तत्र गच्छति अदृश्यो भूत्वा एतादृशं वाणप्रहारं करोति येन नौकायाः नद्यां पतनं भवति। प्रसन्नः रावणः पुनः लङ्कायां प्रत्यावर्तितो भवति।)

(लङ्कायाः दृश्यम्)

(रावणः स्वामात्यैः सह सिंहासने उपविष्टो दृश्यते।)

**रावणः**- भो आमात्याः मन्त्रिणश्च। यूयं सर्वे भारते गच्छत। तत्र ये केऽपि राजानः सन्ति तेभ्यः करत्वेन धनमादाय शीघ्रं समागच्छत। अरण्येषु च ये केऽपि ऋषयः आश्रमवासिनश्च सन्ति तेषां सकाशादपि धनमादाय राजकोषाय प्रयच्छत।

**आमात्याः दूताश्च**- आज्ञा शिरोधार्याऽस्ति भवतां महाराज!

(भारते आश्रमस्य दृश्यम्)

(आश्रमे ऋषयः स्वकार्येषु संलग्नाः दृश्यन्ते, अत्र पशवः हरिणादयोऽपि दृश्यन्ते।)

**दूताः**- भोः भोः मुनयः सावधानेन शृणुत। अस्माकं महाराजः रावणः आदिशति भारते ये केऽपि आश्रमवासिनः सन्ति तैरपि करदानं परमावश्यकम् अतः भवतां पार्श्वे यत्किञ्चदस्ति तत्सर्वम् अस्मान् समर्पयत्।

**मुनयः**- भो दूता-

**तपस्वीनां नः भो निखिलवनवृत्तिः सुविदिता**
**क्व चास्माकं पार्श्वे सकलसुखभोग्या हि कमला।**
**क्षितीशानां दासाः वयमिह समानाः मुनिजनाः**
**अतः सर्वे क्षम्याः सकलकरदाने विरमिताः।।**

**दूताः**- भो भो तापसाः। प्रथमं नृपाज्ञैवास्माकं कृते शिरोधार्या खलु। अतः यत्किंचिदस्ति युष्माकं गृहे तद्देहि नो चेत् समश्रूणामुत्पाटनाय सज्जीभव।

**मुनिः**- शिष्यं प्रति- भो शिष्य! रिक्तघटमानय समश्रुरेवास्माकं तपोबलम् अतः समश्रून्संरक्ष्य रक्तदानं वयं कुर्मः।

सर्वे मुनयः क्षुरिकया अङ्गान् कर्तयित्वा रक्तेन रिक्तं घटं पूरयित्वा दूतेभ्यः समर्पयन्ति।

-क्रमशः-

**-सरस्वतीः खर्ककार्की**
**चम्पावतम् ( उत्तराखण्डम् )**

# मातुलपराजयम्-लघुनाटकम्

**-नारायणशास्त्री काङ्करः**

**क्रमशः**

**द्वितीय-दृश्यम्**

**चन्द्रधरः**:- नमो नमः सम्बन्धि-महाराज! अहम् अस्मि भवतः भाविनः जामातुः द्राक्तरस्य मातुलः । नाम्ना मां 'चन्द्रधरः' इति कथयन्ति जनाः। अत्र एव सचिवालये कार्यं करोमि। ह्यः एव रात्रौ अयं शुभ-समाचारः ज्ञातः। अनेन सम्बन्धेन नितरां प्रसन्नः अस्मि। भवादृशस्य विख्यात-शिक्षकस्य सुदक्षां सत्पुत्रीं लब्ध्वा मम भागिनेयः द्राक्तरः सत्यम् एव भाग्यवान् भविता। भवता अस्मिन् विवाहे कियद्-धनराशिं व्ययीकर्तुं स्थिरीकृतम् अस्ति? अयं विवाहः भवतः अस्मद्-भागिनेय-पितुः च प्रतिष्ठानुरूपं भवेत् एव। पुनः स भागिनेय-पिता तु भवतः सहपाठी अपि वर्त्तते। अस्माद् अपि कारणाद् अनेन विवाहेन भव्येन एव भाव्यम्।

**श्यामसुन्दरः**:- (विभीतः अपि स्वमनोभावं गोपायन् इव) महाराज! यथाशक्ति इमं विवाहं भव्यम् एव विधातुं प्रयतिष्ये। कन्या-पितुः अन्तिकं कन्या-कलशाभ्याम् अतिरिक्तं दातुं विशिष्टं भवति एव किम्?

**चन्द्रधरः**:-सत्यं कथयति भवान्, परन्तु तथापि 'आहारे व्यवहारे च त्यक्तलज्जा सुखी भवेत्' इति आभाणकानुसारं यौतुकादि-दान-विषये पूर्वं स्पष्टीकरणं हिताय भवति, अन्यथा पश्चात् मनोमालिन्य-जनकं महामहताम् अनर्थानाम् उत्पादकं च जायते। अतः एव मया स्मारितम् अस्ति पूर्वम्।

**श्यामसुन्दरः**:- अहम् एतिस्मन् सम्बन्धे अनिल-महाशयं स्वाभिप्रायं प्रकटयितुं पर्याप्तं प्रैरयम्, परन्तु तेन किञ्चित् कथितम् एव न। सर्वं किञ्चित् मयि एव त्यक्तम्। सम्प्रति अहं तद् एव करिष्ये यद् उभयोः कुलयोः प्रेम-वर्धकम् अन्येषां च कृते आदर्श-रूपं भविता।

**चन्द्रधरः**:- महाराज! अनिल-महाशयेन मित्रता-वशात् सङ्कोचं कृत्वा स्वमुखेन प्रत्यक्षं किञ्चित् न उक्तम्। किन्तु सम्प्रति स मन्मुखेन स्वकीयं हार्दम् एवं प्रकटितवान् अस्ति

यत् अस्मिन् विवाहे पञ्चलक्ष-रूप्यकाणां यौतुकं दातुं वरयात्रिणां दशशतीं भोजयितुं च यदि समुद्यतः भवान् तर्हि अयं विवाह-प्रस्तावः अस्माभिः स्वीक्रियते, अन्यथा नैव। अस्माकं सज्जनतायाः लाभः भवता न ग्राह्यः।

**श्यामसुन्दरः**- (स्वपादयोः अधस्तात् मृत्तिकां स्खलिताम् एव अनुभवन् आत्मानं सम्भालयन्) मम मित्रम् एवं भवतुं न अर्हति, कदापि तत् कुटिलं मयि न आचरति। अहं पुनरअपि तत् साक्षात्कृत्य स्वकीयं स्पष्टीकरणं दातुं प्रार्थयिष्ये।

**चन्द्रधरः**- (आत्मीयतां दर्शयन्) प्रार्थनायाः का आवश्यकता? यदि भवतः एतावत् सामर्थ्यं स्यात् तर्हि प्रस्तावः स्वीकार्यः। सम्मुखम् आगतं भवन्तं साम्प्रतम् अपि अनिलः प्रत्यक्षं न किञ्चित् कथयिष्यति। इदानीं स धर्म-सङ्कटे पतितः अस्ति। आम्, अहं तम् अनुरोध्य एकलक्ष-रूप्यकाणां शतत्रय-वरयात्रिणां च भुक्तिं दापयितुं भवन्तं विश्वासयामि। यदि मम मध्यस्थतया भवते आनन्दः न मिलितः तर्हि सा व्यर्था एव खलु, व्यर्थः च मम अनुभवः।

**श्यामसुन्दरः**- (उष्णं दीर्घं च निःश्वस्य अगतिगतिकः सन्) महाराज! मित्रता-निर्वाहः तु करणीयः एव। तस्य मनीषा कथं टालयितुं शक्यते? पुनः भवान् तु मध्यस्थः। अस्मिन् प्रस्तावे स्वीकृतिं ददामि। स्वीकृतिः मम मित्राय विज्ञापनीया।

**चन्द्रधरः**- (स्वीयां चेष्टां सफलाम् एव मन्यमानः सहर्षम्) शुभं भूयात् भवते। अहम् अतीव प्रमुदितः अस्मि। चलामि तावत् भवदीयां स्वीकृतिं। भवतः मित्राय ज्ञापयितुम् (निर्गच्छति)।

## तृतीय-दृश्यम्

(विवाह-स्थले वैवाहिक-कार्येषु व्यस्तं श्यामसुन्दरं समुपेत्य)

**एका व्यक्तिः** - सम्बन्धि-प्रवर! इतः एकान्ते आयातु। वरयात्रि-विश्रामशालायां संस्थितेन श्रीमता वर-मातुल-चन्द्रधर-महोदयेन भवते मन्मुखेन सन्देशः प्रेषितः अस्ति यत् अयं वर-महाशयः यौतुके स्वस्मै एकं कारयानं वाञ्छति। यदि तद् दातुं स्वीक्रियते, तर्हि असौ रात्रौ विवाह-मुहूर्त्ते मण्डपे आयास्यति, अन्यथा नैव।

**श्यामसुन्दरः**- (निश्चेतनः इव सन् किङ्कर्त्तव्य-विमूढः) चलतु, अहमेव स्वपक्षीयान् दश पञ्चदश वृद्धजनान् आदाय मातुल-महाशयेन सह वार्त्तां कर्तुं चलामि। (तथा करोति,

मातुलम् उपसृत्य सनमस्कारम्) मातुल महाराज! यदि इदम् अभीष्टम् आसीत् तर्हि पूर्वम् एव किं न कथितम्? सम्प्रति अर्धरात्रे व्यतीते सहसा कुतः आनेतुं शक्यते?

**चन्द्रधरः**- यदि आनेतुं न शक्यते, तर्हि वर-मनो-रक्षणाय तन्मूल्यं सम्प्रति प्रदीयतां, पश्चात् दिने तद् अस्माभिः क्रेष्यते।

**श्यामसुन्दरः**- एतावतः राशेः अपि तु प्रबन्धः करणीयः एव भविता। अहं गृहे गत्वा पत्नीं पृच्छामि (निर्गच्छति)।

## चतुर्थ-दृश्यम्

(ज्ञातैतद्-वृत्तान्ता क्षुब्धान्तःकरणा वृद्धजनैः निवारिता अपि स्वयम् एव तत्कालं वर-वास-स्थलम् उपेत्य सोत्तेजनम्)

**सुलोचना**- अपि अस्यां वरयात्रायां सम्मिलिताः सर्वे अपि सज्जनाः! शृण्वन्तु मम विनम्र- निवेदनम्। लोभस्य अपि काचन सीमा भवति। अधुनावधि मम पित्रा वर-पक्षतः यत् प्रस्तुतं, तत् तत् यथा कथञ्चित् स्वसामर्थ्ये असति अपि ऋणं कृत्वा पूरयितुं स्वीकृतम्। मम पितुः उपरि ऋणस्य एतावान् भारः आपतितः अस्ति यत् मातुः सर्वाणि आभूषणानि, पितृ-पितामहात् आगतं च गृहं विक्रीय अपि पूर्णतया सः उत्तारयितुं न शक्यते। अयं विवाहः किं सञ्जातः? एकप्रकारेण मम माता-पितरौ नरके निपातयितुम् उपायः संवृत्तः। अस्य मम विवाहस्य मम अनुजासु अनुजेषु च कः दुष्प्रभावः भविता? किम् इदं भवद्भिः अपि प्रबुद्धैः कदाचिद् विचारितम्? अहं मम माता-पित्रोः भ्रातृ-भगिन्योः च दुःखम् अधिकं वर्धयितुं न वाञ्छामि। मया अपि निर्णयः कृतः यत् अहम् इमं विवाहं न स्वीकरोमि।

**केचन वरयात्रिणः**- (परस्परम्) वयम् अपि इमं विवाहं न रोचयामः । या वधूः एवं निर्लज्जं सर्वथा सम्मुखं भाषते सा अस्माकं वराय किं सुखं दास्यति? वर महाशय! उत्थीयताम्। भवान् तु द्राक्तरः । भवते अनेका वध्वः मेलितारः। चल्यताम् इतः। अत्र एकं क्षणम् अपि न स्थातव्यम् अस्ति।

**वर-महाशयः द्राक्तरः**-(उत्थाय साक्रोशं मातुलं प्रति) मातुल महानुभाव! माम् अपृष्ट्वा यथेष्टाचरणस्य फलम् उपभुज्यताम्। अहम् आरम्भतः एव कथयन् आसं यात् अहं यौतुकं न किम् अपि इच्छामि, न च मम पिता एव इच्छति, मम माता अपि भवता बोधयितुं शक्यते स्म, परं तां प्रोत्साह्य निरङ्कुशम् एव आचरितम्। इदानीम् अपि च

भवान् विवाह–क्षणे निज–प्रकृतिं त्यक्तुं न उद्यतः। अनेन भवदाचरणेन तु मम नासा एव छिन्ना। अहम् इदम् अपयशः कारयितुं न इच्छामि।

(पुनः सुलोचनाम् अभिलक्ष्य)

अयि भद्रे! सन्तुष्टः अस्मि तव अनेन सुस्पष्टेन भाषणेन। अहम् अपि न वाञ्छामि तव माता–पितरौ भ्रातृ–भगिन्यौ च विपत्सागरे निपातयितुम्। यौतुकसामग्रीं विक्रीय ऋणभारं लघुं कुरुतां तव माता–पितरौ। अहं विना किमपि यौतुक–ग्रहणं त्वां स्वीकरिष्यामि। अपि अधुनावधि कृतं दुश्चेष्टितं विस्मृत्य द्वयोः अपि कुलयोः दुष्कीर्ति–वारणाय निज–निर्णयं परिवर्त्तयिष्यसि?


**सुलोचना**– (सहर्षं सशिरः–कम्पम् ) आम्, निज–निर्णयं परिवर्त्तयामि। विवाह–मण्डपे भवद्–आगमनं प्रतीक्षे। (प्रतिष्ठते)।

**वरयात्रिणः**– (सानन्दं वर–वध्वोः तत्साहसार्थं प्रशंसा कुर्वन्तः) शिव–सङ्कल्पः, शिव सङ्कल्पः। विकृता वार्त्ता सुधृता। भगवत्कृपया भविष्णुः एकः महान् अनर्थः टलितः । यदि सर्वाः एव वर–वध्वः एवम् आचरेयुः, तर्हि यौतुक–यातुधानः समाजतः सर्वथा उन्मूलितः एव स्यात्। दृश्यते किम्? अस्मिन् द्विगुणित–प्रहर्ष–समये उदर–शूलस्य व्याजं कृत्वा गृहे एव संस्थितं वर–पितरं शुभ–समाचारम् इमं संश्राव्य विवाहे समानेतुं चलेम। अधुना विलम्बः न उचितः। विवाह–वेला निकटे आयाति। (प्रस्थातुम् उद्यताः भवन्ति)

**–विद्या–वैभव–भवनम्**

**२९–केसर–विहारः**

**जगतपुरा, जयपुरम्–३०२०१७ ( राजस्थानम् )**



RNI No.
DELSAN/2013/50379

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी के
स्वामित्व द्वारा मै. एस.डी.एम. प्रिन्टर एण्ड पैकर,
हरिनगर, घण्टा घर, नई दिल्ली-64
से मुद्रित और दिल्ली संस्कृत अकादमी, प्लाट सं.-5,
झण्डेवालान, करोलबाग, नई दिल्ली-110005 से प्रकाशित।